# AdityahRidayam

# આદિત્યહૃદયમ્

## Document Information

Text title : AdityahRidayabhaviShyottarapurANa

File name : AdityahRRidayabhaviShyottarapurANa.itx

Category : hRidaya, navagraha

Location : doc_z_misc_navagraha

Author : Traditional

Transliterated by : Nat Natarajan nat.natarajan at gmail.com

Proofread by : Nat Natarajan nat.natarajan at gmail.com, NA

Description-comments : From Brihatstotraratnakara with 408 stotras

Source : bhaviShyottarapurANa

Latest update : August 13, 2021

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 11, 2023

*sanskritdocuments.org*

# આદિત્યહૃદયમ્

ભવિષ્યોત્તરપુરાણાન્તર્ગતમ્

શ્રીગણેશાય નમઃ ।

અથ આદિત્યહૃદયમ્ ।
શતાનીક ઉવાચ ।
કથમાદિત્યમુદ્યન્તમુપતિષ્ઠેદ્દ્વિજોત્તમઃ ।
એતન્મેબ્રૂહિ વિપ્રેન્દ્ર પ્રપદ્યે શરણં તવ ॥ ૧॥

સુમન્તુરુવાચ ।
ઇદમેવ પુરા પૃષ્ટઃ શઙ્ખચક્રગદાધરઃ ।
પ્રણમ્ય શિરસા દેવમર્જુનેન મહાત્મના ॥ ૨॥

કુરુક્ષેત્રે મહારાજપ્રવૃત્તે ભારતે રણે ।
કૃષ્ણનાથં સમાસાદ્ય પ્રાર્થયિત્વાબ્રવીદિદમ્ ॥ ૩॥

અર્જુન ઉવાચ ।
જ્ઞાનં ચ ધર્મશાસ્ત્રાણાં ગુહ્યાદ્ગુહ્યતરં તથા ।
મમ કૃષ્ણ પરિજ્ઞાતં વાઙ્મયં સચરાચરમ્ ॥ ૪॥

સૂર્યસ્તુતિમયં ન્યાસં વક્તુમર્હસિ માધવ ।
ભક્ત્યા પૃચ્છામિ દેવેશ કથયસ્વ પ્રસાદતઃ ॥ ૫॥

સૂર્યભક્તિં કરિષ્યામિ કથં સૂર્યં પ્રપૂજયેત્ ।
તદહં શ્રોતુમિચ્છામિ ત્વત્પ્રસાદેન યાદવ ॥ ૬॥

શ્રીભગવાનુવાચ ।
રુદ્રાદિદૈવતૈઃ સર્વૈઃ પૃષ્ટેન કથિતં મયા ।
વક્ષ્યેઽહં સૂર્યવિન્યાસં શ‍ૃણુ પાણ્ડવ યત્નતઃ ॥ ૭॥

અસ્માકં યત્ત્વયા પૃષ્ટમેકચિત્તો ભવાર્જુન ।

તદહં સમ્પ્રવક્ષ્યામિ આદિમધ્યાવસાનકમ્ ॥ ૮॥

અર્જુન ઉવાચ ।
નારાયણ સુરશ્રેષ્ઠ પૃચ્છામિ ત્વાં મહાયશઃ ।
કથમાદિત્યમુદ્યન્તમુપતિષ્ઠેત્સનાતનમ્ ॥ ૯॥

શ્રીભગવાનુવાચ ।
સાધુ પાર્થ મહાબાહો બુદ્ધિમાનસિ પાણ્ડવ ।
યન્માં પૃચ્છસ્યુપસ્થાનં તત્પવિત્રં વિભાવસોઃ ॥ ૧૦॥

સર્વમઙ્ગલમાઙ્ગલ્યં સર્વપાપપ્રણાશનમ્ ।
સર્વરોગપ્રશમનમાયુર્વર્ધનમુત્તમમ્ ॥ ૧૧॥

અમિત્રદમનં પાર્થ સઙ્ગ્રામે જયવર્ધનમ્ ।
વર્ધનં ધનપુત્રાણામાદિત્યહૃદયં શ‍ૃણુ ॥ ૧૨॥

યચ્છ્રુત્વા સર્વપાપેભ્યો મુચ્યતે નાત્ર સંશયઃ ।
ત્રિષુ લોકેષુ વિખ્યાતં નિઃશ્રેયસકરં પરમ્ ॥ ૧૩॥

દેવદેવં નમસ્કૃત્ય પ્રાતરુત્થાય ચાર્જુન ।
વિઘ્નાન્યનેકરૂપાણિ નશ્યન્તિ સ્મરણાદપિ ॥ ૧૪॥

તસ્માત્સર્વપ્રયત્નેન સૂર્યમાવાહયેત્ સદા ।
આદિત્યહૃદયં નિત્યં જાપ્યં તચ્છૃણુ પાણ્ડવ ॥ ૧૫॥

યજ્જપાન્મુચ્યતે જન્તુર્દારિદ્ર્યાદાશુ દુસ્તરાત્ ।
લભતે ચ મહાસિદ્ધિં કુષ્ઠવ્યાધિવિનાશિનીમ્ ॥ ૧૬॥

અસ્મિન્મન્ત્રે ઋષિશ્છન્દો દેવતાશક્તિરેવ ચ ।
સર્વમેવ મહાબાહો કથયામિ તવાગ્રતઃ ॥ ૧૭॥

મયા તે ગોપિતં ન્યાસં સર્વશાસ્ત્રપ્રબોધિતમ્ ।
અથ તે કથયિષ્યામિ ઉત્તમં મન્ત્રમેવ ચ ॥ ૧૮॥

ૐ અસ્ય શ્રીઆદિત્યહૃદયસ્તોત્રમન્ત્રસ્ય શ્રીકૃષ્ણ ઋષિઃ ।
શ્રીસૂર્યાત્મા ત્રિભુવનેશ્વરો દેવતા અનુષ્ટુપ્છન્દઃ ।
હરિતહયરથં દિવાકરં ઘૃણિરિતિ બીજમ્ ।
ૐ નમો ભગવતે જિતવૈશ્વાનરજાતવેદસે ઇતિ શક્તિઃ ।
ૐ નમો ભગવતે આદિત્યાય નમઃ ઇતિ કીલકમ્ ।

ૐ અગ્નિગર્ભદેવતા ઇતિ મન્ત્રઃ ।
ૐ નમો ભગવતે તુભ્યમાદિત્યાય નમોનમઃ ।
શ્રીસૂર્યનારાયણપ્રીપ્યર્થં જપે વિનિયોગઃ ।
અથ ન્યાસઃ ।
ૐ હ્રાં અઙ્ગુષ્ઠાભ્યાં નમઃ ।
ૐ હ્રીં તર્જનીભ્યાં નમઃ ।
ૐ હ્રૂં મધ્યમાભ્યાં નમઃ ।
ૐ હ્રૈં અનામિકાભ્યાં નમઃ ।
ૐ હ્રૌં કનિષ્ઠિકાભ્યાં નમઃ ।
ૐ હ્રઃ કરતલકરપૃષ્ઠાભ્યાં નમઃ ।
ૐ હ્રાં હૃદયાય નમઃ ।
ૐ હ્રીં શિરસે સ્વાહા ।
ૐ હ્રૂં શિખાય વષટ્ ।
ૐ હ્રૈં કવચાય હુમ્
ૐ હ્રૌં નેત્રત્રયાય વૌષટ્ ।
ૐ હ્રઃ અસ્ત્રાય ફટ્ ।
ૐ હ્રાં હ્રીં હ્રૂં હ્રૈં હ્રૌં હ્રઃ ઇતિ દિગ્બન્ધઃ ॥

અથ ધ્યાનમ્ ॥

ભાસ્વદ્રત્નાઢ્યમૌલિઃ સ્ફુરદધરરુચા રઞ્જિતશ્ચારુકેશો
   ભાસ્વાન્યો દિવ્યતેજાઃ કરકમલયુતઃ સ્વર્ણવર્ણઃ પ્રભાભિઃ ।
વિશ્વાકાશાવકાશગ્રહપતિશિખરે ભાતિ યશ્ચોદયાદ્રૌ
   સર્વાનન્દપ્રદાતા હરિહરનમિતઃ પાતુ માં વિશ્વચક્ષુઃ ॥ ૧॥

પૂર્વમષ્ટદલં પદ્મં પ્રણવાદિપ્રતિષ્ઠિતમ્ ।
માયાબીજં દલાષ્ટાગ્રે યન્ત્રમુદ્ધારયેદિતિ ॥ ૨॥

આદિત્યં ભાસ્કરં ભાનું રવિં સૂર્યં દિવાકરમ્ ।
માર્તણ્ડં તપનં ચેતિ દલેષ્વષ્ટસુ યોજયેત્ ॥ ૩॥

દીપ્તા સૂક્ષ્મા જયા ભદ્રા વિભૂતિર્વિમલા તથા ।
અમોઘા વિદ્યુતા ચેતિ મધ્યે શ્રીઃ સર્વતો મુખી ॥ ૪॥

સર્વજ્ઞઃ સર્વગશ્ચૈવ સર્વકારણદેવતા ।
સર્વેશં સર્વહૃદયં નમામિ સર્વસાક્ષિણમ્ ॥ ૫॥

સર્વાત્મા સર્વકર્તા ચ સૃષ્ટિજીવનપાલકઃ ।
હિતઃ સ્વર્ગાપવર્ગશ્ચ ભાસ્કરેશ નમોઽસ્તુ તે ॥ ૬॥

ઇતિ પ્રાર્થના ॥

નમો નમસ્તેઽસ્તુ સદા વિભાવસો સર્વાત્મને સપ્તહયાય ભાનવે ।
અનન્તશક્તિર્મણિભૂષણેન દદસ્વ ભુક્તિં મમ મુક્તિમવ્યયામ્ ॥ ૭॥

અર્કં તુ મૂર્ધ્નિ વિન્યસ્ય લલાટે તુ રવિં ન્યસેત્ ।
વિન્યસેન્નેત્રયોઃ સૂર્યં કર્ણયોશ્ચ દિવાકરમ્ ॥ ૮॥

નાસિકાયાં ન્યસેદ્ભાનું મુખે વૈ ભાસ્કરં ન્યસેત્ ।
પર્જન્યમોષ્ઠયોશ્ચૈવ તીક્ષ્ણં જિહ્વાન્તરે ન્યસેત્ ॥ ૯॥

સુવર્ણરેતસં કણ્ઠે સ્કન્ધયોનિતગ્મતેજસમ્ ।
બાહ્વોસ્તુ પૂષણં ચૈવ મિત્રં વૈ પૃષ્ઠતો ન્યસેત્ ॥ ૧૦॥

વરુણં દક્ષિણે હસ્તે ત્વષ્ટારં વામતઃ કરે ।
હસ્તાવુષ્ણકરઃ પાતુ હૃદયં પાતુ ભાનુમાન્ ॥ ૧૧॥

ઉદરે તુ યમં વિદ્યાદાદિત્યં નાભિમણ્ડલે ।
કટ્યાં તુ વિન્યસેદ્ધંસં રુદ્રમૂર્વોસ્તુ વિન્યસેત્ ॥ ૧૨॥

જાન્વોસ્તુ ગોપતિં ન્યસ્ય સવિતારં જઙ્ઘયોઃ ।
પાદયોશ્ચ વિવસ્વન્તં ગુલ્ફયોશ્ચ દિવાકરમ્ ॥ ૧૩॥

બાહ્યતસ્તુ તમોધ્વંસ ભગમભ્યન્તરે ન્યસેત્ ।
સર્વાઙ્ગેષુ સહસ્રાંશું દિગ્વિદિક્ષુ ભગ ન્યસેત્ ॥ ૧૪॥

ઇતિ દિગ્બન્ધઃ ।
એષ આદિત્યવિન્યાસો દેવાનામપિદુર્લભઃ ।
ઇમં ભક્ત્યા ન્યસેત્પાર્થ સ યાતિ પરમાં ગતિમ્ ॥ ૧૫॥

કામક્રોધકૃતાત્પાપાન્મુચ્યતે નાત્ર સંશયઃ ।
સર્પાદપિ ભયં નૈવ સઙ્ગ્રામેષુ પથિષ્વપિ ॥ ૧૬॥

રિપુસઙ્ઘટ્ટકાલેષુ તથા ચોરસમાગમે ।
ત્રિસન્ધ્યં જપતો ન્યાસ મહાપાતકનાશનમ્ ॥ ૧૭॥

વિસ્ફોટકસમુત્પન્ન તીવ્રજ્વરસમુદ્ભવમ્ ।
શિરોરોગં નેત્રરોગં સર્વવ્યાધિવિનાશનમ્ ॥ ૧૮॥

કુષ્ઠવ્યાધિસ્તથા દદ્રુરોગાશ્ચ વિવિધાશ્ચ યે ।
જપમાનસ્ય નશ્યન્તિ શ્ ૃણુ ભક્ત્યા તદર્જુન ॥ ૧૯॥

આદિત્યો મન્ત્રસંયુક્ત આદિત્યો ભુવનેશ્વરઃ ।
આદિત્યાન્નાપરો દેવો હ્યાદિત્યઃ પરમેશ્વરઃ ॥ ૨૦॥

આદિત્યમર્ચયેદ્બ્રહ્મા શિવ આદિત્યમર્ચયેત્ ।
યદાદિત્યમયં તેજો મમ તેજસ્તદર્જુન ॥ ૨૧॥

આદિત્યં મન્ત્રસંયુક્તમાદિત્યં ભુવનેશ્વરમ્ ।
આદિત્યં યે પ્રપશ્યન્તિ માં પશ્યન્તિ ન સંશયઃ ॥ ૨૨॥

ત્રિસન્ધ્યમર્ચયેત્સૂર્યં સ્મરેદ્ભક્ત્યા તુ યો નરઃ ।
ન સ પશ્યતિ દારિદ્ર્યં જન્મજન્મનિ ચાર્જુન ॥ ૨૩॥

એતત્તે કથિતં પાર્થ આદિત્યહૃદયં મયા ।
શ્ ૃણ્વન્મુક્તશ્ચ પાપેભ્યઃ સૂર્યલોકે મહીયતે ॥ ૨૪॥

નમો ભગવતે તુભ્યમાદિત્યાય નમો નમઃ ।
આદિત્યઃ સવિતા સૂર્યઃ ખગઃ પૂષા ગભસ્તિમાન્ ॥ ૨૫॥

સુવર્ણઃ સ્ફટિકો ભાનુઃ સ્ફુરિતો વિશ્વતાપનઃ ।
રવિર્વિશ્વો મહાતેજાઃ સુવર્ણઃ સુપ્રબોધકઃ ॥ ૨૬॥

હિરણ્યગર્ભસ્ત્રિશિરાસ્તપનો ભાસ્કરો રવિઃ ।
માર્તણ્ડો ગોપતિઃ શ્રીમાન્ કૃતજ્ઞશ્ચ પ્રતાપવાન્ ॥ ૨૭॥

તમિસ્રહા ભગો હંસો નાસત્યશ્ચ તમોનુદઃ ।
શુદ્ધો વિરોચનઃ કેશી સહસ્રાંશુર્મહાપ્રભુઃ ॥ ૨૮॥

વિવસ્વાન્પૂષણો મૃત્યુર્મિહિરો જામદગ્ન્યજિત્ ।
ધર્મરશ્મિઃપતઙ્ગશ્ચ શરણ્યો મિત્રહા તપઃ ॥ ૨૯॥

દુર્વિજ્ઞેયગતિઃ શૂરસ્તેજોરશ્મિર્મહાયશાઃ ।
શમ્ભુશ્ચિત્રાઙ્ગદઃ સૌમ્યો હવ્યકવ્યપ્રદાયકઃ ॥ ૩૦॥

અંશુમાનુત્તમો દેવ ઋગ્યજુઃસામ એવ ચ ।
હરિદશ્વસ્તમોદારઃ સપ્તસપ્તિર્મરીચિમાન્ ॥ ૩૧॥

અગ્નિગર્ભોઽદિતેઃ પુત્રઃ શમ્ભુસ્તિમિરનાશનઃ ।

પૂષા વિશ્વમ્ભરો મિત્રઃ સુવર્ણઃ સુપ્રતાપવાન્ ॥ ૩૨॥

આતપી મણ્ડલી ભાસ્વાંસ્તપનઃ સર્વતાપનઃ ।
કૃતવિશ્વો મહાતેજઃ સર્વરત્નમયોદ્ભવઃ ॥ ૩૩॥

અક્ષરશ્ચ ક્ષરશ્ચૈવ પ્રભાકરવિભાકરૌ ।
ચન્દ્રશ્ચન્દ્રાઙ્ગદઃ સૌમ્યો હવ્યકવ્યપ્રદાયકઃ ॥ ૩૪॥

અઙ્ગારકો ગદોઽગસ્તી રક્તાઙ્ગશ્ચાઙ્ગવર્ધનઃ ।
બુધો બુદ્ધાસનો બુદ્ધિર્બુદ્ધાત્મબુદ્ધિવર્ધનઃ ॥ ૩૫॥

બૃહદ્ભાનુર્બૃહદ્ભાસો બૃહદ્ધામા બૃહસ્પતિઃ ।
શુક્લસ્ત્વં શુક્લરેતાસ્ત્વં શુક્લાઙ્ગઃ શુક્લભૂષણઃ ॥ ૩૬॥

શનિમાન્ શનિરૂપસ્ત્વં શનૈર્ગચ્છસિ સર્વદા ।
અનાદિરાદિરાદિત્યસ્તેજોરાશિર્મહાતપાઃ ॥ ૩૭॥

અનાદિરાદિરૂપસ્ત્વમાદિત્યો દિક્પતિર્યમઃ ।
ભાનુમાન્ ભાનુરૂપસ્ત્વં સ્વર્ભાનુર્ભાનુદીતિમાન્ ॥ ૩૮॥

ધૂમ્રકેતુર્મહાકેતુઃ સર્વકેતુરનુત્તમઃ ।
તિમિરાવરણઃ શમ્ભુઃ સ્ત્રષ્ટા માર્તણ્ડએવ ચ ॥ ૩૯॥

નમઃ પૂર્વાય ગિરયે પશ્ચિમાય નમો નમઃ ।
નમોત્તરાય ગિરયે દક્ષિણાય નમો નમઃ ॥ ૪૦॥

નમો નમઃ સહસ્રાંશો હ્યાદિત્યાય નમો નમઃ ।
નમઃપદ્મપ્રબોધાય નમસ્તે દ્વાદશાત્મને ॥ ૪૧॥

નમો વિશ્વપ્રબોધાય નમો ભ્રાજિષ્ણુજિષ્ણવે ।
જ્યોતિષે ચ નમસ્તુભ્યં જ્ઞાનાકાર્ય નમો નમઃ ॥ ૪૨॥

પ્રદીપ્તાય પ્રગલ્ભાય યુગાન્તાય નમો નમઃ ।
નમસ્તે હોતૃપતયે પૃથિવીપતયે નમઃ ॥ ૪૩॥

નમોઙ્કાર વષટ્કાર સર્વયજ્ઞ નમોઽસ્તુ તે ।
ઋગ્વેદાય યજુર્વેદ સામવેદ નમોઽસ્તુ તે ॥ ૪૪॥

નમો હાટકવર્ણાય ભાસ્કરાય નમો નમઃ ।
જયાય જયભદ્રાય હરિદશ્વાય તે નમઃ ॥ ૪૫॥

દિવ્યાય દિવ્યરૂપાય ગ્રહાણાં પતયે નમઃ ।
નમસ્તે શુચયે નિત્યં નમઃ કુરુકુલાત્મનમ્ ॥ ૪૬॥

નમસ્ત્રૈલોક્યનાથાય ભૂતાનાં પતયે નમઃ ।
નમઃ કૈવલ્યનાથાય નમસ્તે દિવ્યચક્ષુષે ॥ ૪૭॥

ત્વં જ્યોતિસ્ત્વં દ્યુતિર્બ્રહ્મા ત્વં વિષ્ણુસ્ત્વં પ્રજાપતિઃ ।
ત્વમેવ રુદ્રો રુદ્રાત્મા વાયુરગ્નિસ્ત્વમેવ ચ ॥ ૪૮॥

યોજનાનાં સહસ્રે દ્વે શતે દ્વે દ્વે ચ યોજને ।
એકેન નિમિષાર્ધેન ક્રમમાણ નમોઽસ્તુ તે ॥ ૪૯॥

નવયોજનલક્ષાણિ સહસ્રદ્વિશતાનિ ચ ।
યાવદ્ઘટીપ્રમાણેન ક્રમમાણ નમોઽસ્તુ તે ॥ ૫૦॥

અગ્રતશ્ચ નમસ્તુભ્યં પૃષ્ઠતશ્ચ સદા નમઃ ।
પાર્શ્વતશ્ચ નમસ્તુભ્યં નમસ્તે ચાસ્તુ સર્વદા ॥ ૫૧॥

નમઃ સુરારિહન્ત્રે ચ સોમસૂર્યાગ્નિચક્ષુષે ।
નમો દિવ્યાય વ્યોમાય સર્વતન્ત્રમયાય ચ ॥ ૫૨॥

નમો વેદાન્તવેદ્યાય સર્વકર્માદિસાક્ષિણે ।
નમો હરિતવર્ણાય સુવર્ણાય નમો નમઃ ॥ ૫૩॥

અરુણો માઘમાસે તુ સૂર્યો વૈ ફાલ્ગુને તથા ।
ચૈત્રમાસે તુ વેદાઙ્ગો ભાનુર્વૈશાખતાપનઃ ॥ ૫૪॥

જ્યેષ્ઠમાસે તપેદિન્દ્ર આષાઢે તપતે રવિઃ ।
ગભસ્તિઃ શ્રાવણે માસિ યમો ભાદ્રપદે તથા ॥ ૫૫॥

ઇષે સુવર્ણરેતાશ્ચ કાર્તિકે ચ દિવાકરઃ ।
માર્ગશીર્ષે તપેન્મિત્રઃ પૌષે વિષ્ણુઃ સનાતનઃ ॥ ૫૬॥

પુરુષસ્ત્વધિકે માસિ માસાધિક્યે તુ કલ્પયેત્ ।
ઇત્યેતે દ્વાદશાદિત્યાઃ કાશ્યપેયાઃ પ્રકીર્તિતાઃ ॥ ૫૭॥

ઉગ્રરૂપા મહાત્માનસ્તપન્તે વિશ્વરૂપિણઃ ।
ધર્માર્થકામમોક્ષાણાં પ્રસ્ફુટા હેતવો નૃપ ॥ ૫૮॥

સર્વપાપહરં ચૈવમાદિત્યં સમ્પ્રપૂજયેત્ ।
એકધા દશધા ચૈવ શતધા ચ સહસ્રધા ॥ ૫૯॥

તપન્તે વિશ્વરૂપેણ સૃજન્તિ સંહરન્તિ ચ ।
એષ વિષ્ણુઃ શિવશ્ચૈવ બ્રહ્મા ચૈવ પ્રજાપતિઃ ॥ ૬૦॥

મહેન્દ્રશ્ચૈવ કાલશ્ચ યમો વરુણ એવ ચ ।
નક્ષત્રગ્રહતારાણામધિપો વિશ્વતાપનઃ ॥ ૬૧॥

વાયુરગ્નિર્ધનાધ્યક્ષો ભૂતકર્તા સ્વયં પ્રભુઃ ।
એષ દેવો હિ દેવાનાં સર્વમાપ્યાયતે જગત્ ॥ ૬૨॥

એષ કર્તા હિ ભૂતાનાં સંહર્તા રક્ષકસ્તથા ।
એષ લોકાનુલોકાશ્ચ સપ્તદ્વીપાશ્ચ સાગરાઃ ॥ ૬૩॥

એષ પાતાલસપ્તસ્થા દૈત્યદાનવરાક્ષસાઃ ।
એષ ધાતા વિધાતા ચ બીજં ક્ષેત્રં પ્રજાપતિઃ ॥ ૬૪॥

એષ એવ પ્રજા નિત્યં સંવર્ધયતિ રશ્મિભિઃ ।
એષ યજ્ઞઃ સ્વધા સ્વહા હ્રીઃ શ્રીશ્ચ પુરુષોત્તમઃ ॥ ૬૫॥

એષ ભૂતાત્મકો દેવઃ સૂક્ષ્મોઽવ્યક્તઃ સનાતનઃ ।
ઈશ્વરઃ સર્વભૂતાનાં પરમેષ્ઠી પ્રજાપતિઃ ॥ ૬૬॥

કાલાત્મા સર્વભૂતાત્મા વેદાત્મા વિશ્વતોમુખઃ ।
જન્મમૃત્યુજરાવ્યાધિસંસારભયનાશનઃ ॥ ૬૭॥

દારિદ્ર્યવ્યસનધ્વંસી શ્રીમાન્દેવો દિવાકરઃ ।
કીર્તનીયો વિવસ્વાંશ્ચ માર્તણ્ડો ભાસ્કરો રવિઃ ॥ ૬૮॥

લોકપ્રકાશકઃ શ્રીમાઁલ્લોકચક્ષુર્ગ્રહેશ્વરઃ ।
લોકસાક્ષી ત્રિલોકેશઃ કર્તા હર્તા તમિસ્રહા ॥ ૬૯॥

તપનસ્તાપનશ્ચૈવ શુચિઃ સપ્તાશ્વવાહનઃ ।
ગભસ્તિહસ્તો બ્રહ્મણ્યઃ સર્વદેવનમસ્કૃતઃ ॥ ૭૦॥

આયુરારોગ્યમૈશ્વર્યં નરા નાર્યશ્ચ મન્દિરે ।
યસ્ય પ્રસાદાત્સન્તુષ્ટિરાદિત્યહૃદયં જપેત્ ॥ ૭૧॥

ઇત્યેનૈર્નામભિઃ પાર્થ આદિત્યં સ્તૌતિ નિત્યશઃ ।
પ્રાતરુત્થાય કૌન્તેય તસ્ય રોગભયં નહિ ॥ ૭૨॥

પાતકાન્મુચ્યતે પાર્થ વ્યાધિભ્યશ્ચ ન સંશયઃ ।

એકસન્ધ્યં દ્વિસન્ધ્યં વા સર્વપાપૈઃ પ્રમુચ્યતે ॥ ૭૩॥

ત્રિસન્ધ્યં જપમાનસ્તુ પશ્યેચ્ચ પરમં પદમ્ ।
યદહ્નાત્કુરુતે પાપં તદહ્નાત્પ્રતિમુચ્યતે ॥ ૭૪॥

યદ્રાત્ર્યાત્કુરુતે પાપં તદ્રાત્ર્યાત્પ્રતિમુચ્યતે ।
દદ્રુસ્ફોટકકુષ્ઠાનિ મણ્ડલાનિ વિષૂચિકા ॥ ૭૫॥

સર્વવ્યાધિમહારોગભૂતબાધાસ્તથૈવ ચ ।
ડાકિની શાકિની ચૈવ મહારોગભયં કુતઃ ॥ ૭૬॥

યે ચાન્યે દુષ્ટરોગાશ્ચ જ્વરાતીસારકાદયઃ ।
જપમાનસ્ય નશ્યન્તિ જીવેચ્ચ શરદાં શતમ્ ॥ ૭૭॥

સંવત્સરેણ મરણં યદા તસ્ય ધ્રુવં ભવેત્ ।
અશીર્ષાં પશ્યતિચ્છાયામહોરાત્રં ધનઞ્જય ॥ ૭૮॥

યસ્ત્વિદં પઠતે ભક્ત્યા ભાનોર્વારે મહાત્મનઃ ।
પ્રાતઃસ્નાને કૃતે પાર્થ એકાગ્રકૃતમાનસઃ ॥ ૭૯॥

સુવર્ણચક્ષુર્ભવતિ ન ચાન્ધસ્તુ પ્રજાયતે ।
પુત્રવાન્ ધનસમ્પન્નો જાયતે ચારુજઃ સુખી ॥ ૮૦॥

સર્વસિદ્ધિમવાપ્નોતિ સર્વત્ર વિજયી ભવેત ।
આદિત્યહૃદયં પુણ્યં સૂર્યનામવિભૂષિતમ્ ॥ ૮૧॥

શ્રુત્વા ચ નિખિલં પાર્થ સર્વપાપૈઃ પ્રમુચ્યતે ।
અતઃ પરતરં નાસ્તિ સિદ્ધિકામસ્ય પાણ્ડવ ॥ ૮૨॥

એતજ્જપસ્વ કૌન્તેય યેન શ્રેયો હ્યવાપ્સ્યસિ ।
આદિત્યહૃદયં નિત્યં યઃ પઠેત્સુસમાહિતઃ ॥ ૮૩॥

ભ્રૂણહા મુચ્યતે પાપાત્કૃતઘ્નો બ્રહ્મઘાતકઃ ।
ગોઘ્નઃ સુરાપો દુર્ભોજી દુષ્પ્રતિગ્રહકારકઃ ॥ ૮૪॥

પાતકાનિ ચ સર્વાણિ દહત્યેવ ન સંશયઃ ।
ય ઇદં શ◌ૃણુયાન્નિત્ય જપેદ્વાઽપિ સમાહિતઃ ॥ ૮૫॥

સર્વપાપવિશુદ્ધાત્મા સૂર્યલોકે મહીયતે ।
અપુત્રો લભતે પુત્રાન્નિર્ધનો ધનમાપ્નુયાત્ ॥ ૮૬॥

કુરોગી મુચ્યતે રોગાદ્ભક્ત્યા યઃ પઠતે સદા ।
યસ્ત્વાદિત્યદિને પાર્થ નાભિમાત્રજલે સ્થિતઃ ॥ ૮૭॥

ઉદયાચલમારૂઢં ભાસ્કરં પ્રણતઃ સ્થિતઃ ।
જપતે માનવો ભક્ત્યા શ઼ૃણુયાદ્વાપિ ભક્તિતઃ ॥ ૮૮॥

સ યાતિ પરમં સ્થાનં યત્ર દેવો દિવાકરઃ ।
અમિત્રદમનં પાર્થ યદા કર્તું સમારભેત્ ॥ ૮૯॥

તદા પ્રતિકૃતિં કૃત્વા શત્રોશ્ચરણપાંસુભિઃ ।
આક્રમ્ય વામપાદેન હ્યાદિત્યહૃદયં જપેત્ ॥ ૯૦॥

એતન્મન્ત્રં સમાહૂય સર્વસિદ્ધિકરં પરમ્ ।
ૐ હ્રીં હિમાલીઢં સ્વાહા । ૐ હ્રીં નિલીઢં સ્વાહા ।
ૐ હ્રીં માલીઢં સ્વાહા । ઇતિ મન્ત્રઃ ।
ત્રિભિશ્ચ રોગી ભવતિ જ્વરી ભવતિ પઞ્ચભિઃ ।
જપૈસ્તુ સપ્તભિઃ પાર્થ રાક્ષસીં તનુમાવિશેત ॥ ૯૧॥

રાક્ષસસેનાભિભૂતસ્ય વિકારાન્ શ઼ૃણુ પાણ્ડવ ।
ગીયતે નૃત્યતે નગ્ન આસ્ફોટયતિ ધાવતિ ॥ ૯૨॥

શિવારુતં ચ કુરુતે હસતે ક્રન્દતે પુનઃ ।
એવં સમ્પીડ્યતે પાર્થ યદ્યપિ સ્યાન્મહેશ્વરઃ ॥ ૯૩॥

કિં પુનર્માનુષઃ કશ્ચિચ્છૌચાચારવિવર્જિતઃ ।
પીડિતસ્ય ન સન્દેહો જ્વરૌ ભવતિ દારુણઃ ॥ ૯૪॥

યદા ચાનુગ્રહં તસ્ય કર્તુમિચ્છેચ્છુભઙ્કરમ્ ।
તદા સલિલમાદાય જપેન્મન્ત્રમિમં બુધઃ ॥ ૯૫॥

નમો ભગવતે તુભ્યમાદિત્યાય નમો નમઃ ।
જયાય જયભદ્રાય હરિદશ્વાય તે નમઃ ॥ ૯૬॥

સ્નાપયેત્તેન મન્ત્રેણ શુભં ભવતિ નાન્યથા ।
અન્યથા ચ ભવેદ્દોષો નશ્યતે નાત્ર સંશયઃ ॥ ૯૭॥

અતસ્તે નિખિલઃ પ્રોક્તઃ પૂજાં ચૈવ નિબોધ મે ।
ઉપલિપ્તે શુચૌ દેશે નિયતો વાગ્યતાઃ શુચિઃ ॥ ૯૮॥

વૃત્તં વા ચતુરસ્રં વા લિપ્તભૂમૌ લિખેચ્છચિ ।

ત્રિધા તત્ર લિખેત્પદ્મમષ્ટપત્રં સકર્ણિકમ્ ॥ ૯૯॥

અષ્ટપત્રંલિખેત્પદ્મં લિપ્તગોમયમણ્ડલે ।
પૂર્વપત્રે લિખેત્ સૂર્યમાગ્નેય્યાં તુ રવિં ન્યસેત્ ॥ ૧૦૦॥

યામ્યાયાં ચ વિવસ્વન્તં નૈરૃત્યાં તુ ભગં ન્યસેત્ ।
પ્રતીચ્યાં વરુણં વિદ્યાદ્વાયવ્યાં મિત્રમેવ ચ ॥ ૧૦૧॥

આદિત્યમુત્તરે પત્રે ઈશાન્યાં મિત્રમેવ ચ ।
મધ્યે તુ ભાસ્કરં વિદ્યાત્ક્રમેણૈવં સમર્ચયેત્ ॥ ૧૦૨॥

અતઃ પરતરં નાસ્તિ સિદ્ધિકામસ્ય પાણ્ડવ ।
મહાતેજઃ સમુદ્યતં પ્રણમેત્સ કૃતાઞ્જલિઃ ॥ ૧૦૩॥

સકેસરાણિ પદ્માનિ કરવીરાણિ ચાર્જુન ।
તિલતન્ડુલયુક્તાનિ કુશગન્ધોદકાનિ ચ ॥ ૧૦૪॥

રક્તચન્દનમિશ્રાણિ કૃત્વા વૈ તામ્રભાજને ।
ધૃત્વા શિરસિ તત્પાત્રં જાનુભ્યાં ધરણીં સ્પૃશેત્ ॥ ૧૦૫॥

મન્ત્રપૂતં ગુડાકેશઃ ચાર્ઘ્યં દદ્યાદ્ગભસ્તયે ।
સાયુધં સરથં ચૈવ સૂર્યમાવાહયામ્યહમ્ ॥ ૧૦૬॥

સ્વાગતો ભવ ।
સુપ્રતિષ્ઠિતો ભવ ।
સન્નિધૌ ભવ ।
સન્નિહિતો ભવ ।
સમ્મુખો ભવ ।
ઇતિ પઞ્ચમુદ્રાઃ ।
સ્ફુટયિત્વાઽર્હયેત્સૂર્યં ભુક્તિ મુક્તિં લભેન્નરઃ ॥ ૧૦૭॥

ૐ શ્રીં વિદ્યા કિલિકિલિકટકેષ્ટસર્વાર્થસાધનાય સ્વાહા ।
ૐ શ્રીં હ્રીં હૂં હંસઃ સૂર્યાય નમઃ સ્વાહા ।
ૐ શ્રીં હ્રાં હ્રીં હૂં હ્રઃ સૂર્યમૂર્તયે સ્વાહા ।
ૐ શ્રીં હ્રીં ખં ખઃ લોકાય સૂર્યમૂર્તયે સ્વાહા ।
ૐ હૂં માર્તણ્ડાય સ્વાહા ।
નમોઽસ્તુ સૂર્યાય સહસ્રભાનવે નમોઽસ્તુ વૈશ્વાનરજાતવેદસે ।
ત્વમેવ ચાર્ઘ્યં પ્રતિગૃહ્ણ દેવ દેવાધિદેવાય નમો નમસ્તે ॥ ૧૦૮॥

નમો ભગવતે તુભ્યં નમસ્તે જાતવેદસે ।
દત્તમર્ઘ્યં મયા ભાનો ત્વં ગૃહાણ નમોઽસ્તુ તે ॥ ૧૦૯॥

એહિ સૂર્ય સહસ્રાંશો તેજોરાશે જગત્પતે ।
અનુકમ્પય માં દેવ ગૃહાણાર્ઘ્યં નમોઽસ્તુતે ॥ ૧૧૦॥

નમો ભગવતે તુભ્યં નમસ્તે જાતવેદસે ।
મમેદમર્ઘ્યં ગૃહ્ણ ત્વં દેવદેવ નમોઽસ્તુ તે ॥ ૧૧૧॥

સર્વદેવાધિદેવાય આધિવ્યાધિવિનાશિને ।
ઇદં ગૃહાણ મે દેવ સર્વવ્યાધિર્વિનશ્યતુ ॥ ૧૧૨॥

નમઃ સૂર્યાય શાન્તાય સર્વરોગવિનાશિને ।
મમેપ્સિતં ફલં દત્ત્વા પ્રસીદ પરમેશ્વર ॥ ૧૧૩॥

ૐ નમો ભગવતે સૂર્યાય સ્વાહા । ૐ શિવાય સ્વાહા ।
ૐ સર્વાત્મને સૂર્યાય નમઃ સ્વાહા । ૐ અક્ષય્યતેજસેનમઃ સ્વાહા ।
સર્વસઙ્કટદારિદ્ર્યં શત્રું નાશય નાશય ।
સર્વલોકેષુ વિશ્વાત્મન્સર્વાત્મન્સર્વદર્શક ॥ ૧૧૪॥

નમો ભગવતે સૂર્ય કુષ્ઠરોગાન્વિખણ્ડય ।
આયુરારોગ્યમૈશ્વર્યં દેહિ દેવ નમોઽસ્તુ તે ॥ ૧૧૫॥

નમો ભગવતે તુભ્યમાદિત્યાય નમો નમઃ ।
ૐ અક્ષય્યતેજસે નમઃ ।
ૐ સૂર્યાય નમઃ ।
ૐ વિશ્વમૂર્તયે નમઃ ।
આદિત્યં ચ શિવં વિદ્યાચ્છિવમાદિત્યરૂપિણમ્ ।
ઉભયોરન્તરં નાસ્તિ આદિત્યસ્ય શિવસ્ય ચ ॥ ૧૧૬॥

એતદિચ્છામ્યહં શ્રોતું પુરુષો વૈ દિવાકરઃ ।
ઉદયે બ્રાહ્મણો રૂપં મધ્યાહ્ને તુ મહેશ્વરઃ ॥ ૧૧૭॥

અસ્તમાને સ્વયં વિષ્ણુસ્ત્રિમૂર્તિશ્ચ દિવાકરઃ ।
નમો ભગવતે તુભ્યં વિષ્ણવે પ્રભવિષ્ણવે ॥ ૧૧૮॥

મમેદમર્ઘ્યં પ્રતિગૃહ્ણ દેવ દેવાધિદેવાય નમો નમસ્તે ।
શ્રીસૂર્યનારાયણાય સાઙ્ગાય સપરિવારાય ઇદમર્ઘ્યં સમર્પયામિ ॥ ૧૧૯॥

હિમઘ્નાય તમોઘ્નાય રક્ષોઘ્નાય ચ તે નમઃ ।
કૃતઘ્નાય સત્યાય તસ્મૈ સૂયાર્ત્મને નમઃ ॥ ૧૨૦ ॥

જયોઽજયશ્ચ વિજયો જિતપ્રાણો જિતશ્રમઃ ।
મનોજવો જિતક્રોધો વાજિનઃ સપ્ત કીર્તિતાઃ ॥ ૧૨૧ ॥

હરિતહયરથં દિવાકરં કનકમયામ્બુજરેણુપિઞ્જરમ્ ।
પ્રતિદિનમુદયે નવં શરણમુપૈમિ હિરણ્યરેતસમ્ ॥ ૧૨૨ ॥

ન તં વ્યાલાઃ પ્રબાધન્તે ન વ્યાધિભ્યોભયં ભવેત્ ।
ન નાગેભ્યો ભયં ચૈવ નચ ભૂતભયં ક્વચિત્ ॥ ૧૨૩ ॥

અગ્નિશત્રુભયં નાસ્તિ પાર્થિવેભ્યસ્તથૈવ ચ ।
દુર્ગતિં તરતે ઘોરાં પ્રજાં ચ લભતે પશૂન્ ॥ ૧૨૪ ॥

સિદ્ધિકામો લભેત્સિદ્ધિં કન્યાકામસ્તુ કન્યકામ્ ।
એતત્પઠેત્સ કૌન્તેય ભક્તિયુક્તેન ચેતસા ॥ ૧૨૫ ॥

અશ્વમેધસહસ્રસ્ય વાજપેયશતસ્ય ચ ।
કન્યાકોટિસહસ્રસ્ય દત્તસ્ય ફલમાપ્નુયાત્ ॥ ૧૨૬ ॥

ઇદમાદિત્યહૃદયં યોઽધીતે સતતં નરઃ ।
સર્વપાપવિશુદ્ધાત્મા સૂર્યલોકે મહીયતે ॥ ૧૨૭ ॥

નાસ્ત્યાદિત્યસમો દેવો નાસ્ત્યાદિત્યસમા ગતિઃ ।
પ્રત્યક્ષો ભગવન્વિષ્ણુર્યેન વિશ્વં પ્રતિષ્ઠિતમ્ ॥ ૧૨૮ ॥

નવતિર્યોજનં લક્ષં સહસ્રાણિ શતાનિ ચ ।
યાવદ્ઘટીપ્રમાણેન તાવચ્ચરતિ ભાસ્કરઃ ॥ ૧૨૯ ॥

ગવાં શતસહસ્રસ્ય સમ્યગ્દત્તસ્ય યત્ફલમ્ ।
તત્ફલં લભતે વિદ્વાઞ્શાન્તાત્મા સ્તૌતિ યો રવિમ્ ॥ ૧૩૦ ॥

યોઽધીતે સૂર્યહૃદયં સકલં સફલં ભવેત્ ।
અષ્ટાનાં બ્રાહ્મણાનાં ચ લેખયિત્વા સમર્પયેત્ ॥ ૧૩૧ ॥

બ્રહ્મલોકે ઋષીણાં ચ જાયતે માનુષોઽપિ વા ।
જાતિસ્મરત્વમાપ્નોતિ શુદ્ધાત્મા નાત્ર સંશયઃ ॥ ૧૩૨ ॥

અજાય લોકત્રયપાવનાય ભૂતાત્મને ગોપતયે વૃષાય ।
સૂર્યાય સર્વપ્રલયાન્તકાય નમો મહાકારુણિકોત્તમાય ॥ ૧૩૩ ॥

વિવસ્વતે જ્ઞાનમૃદન્તરાત્મને જગત્પ્રદીપાય ગજદ્ધિતૈષિણે ।
સ્વયમ્ભુવે દીપ્તસહસ્રચક્ષુષે સુરોત્તમાયામિતતેજસે નમઃ ॥ ૧૩૪॥

સુરૈરનેકૈઃ પરિષેવિતાય હિરણ્યગર્ભાય હિરણ્મયાય ।
મહાત્મને મોક્ષપદાય નિત્યં નમોઽસ્તુ તે વાસરકારણાય ॥ ૧૩૫॥

આદિત્યશ્ચાર્ચિતો દેવ આદિત્યઃ પરમં પદમ્ ।
આદિત્યો માતૃકો ભૂત્વા આદિત્યો વાઙ્મય જગત્ ॥ ૧૩૬॥

આદિત્યં પશ્યતે ભક્ત્યા માં પશ્યતિ ધ્રુવં નરઃ ।
નાદિત્યં પશ્યતે ભક્ત્યા ન સ પશ્યતિ માં નરઃ ॥ ૧૩૭॥

ત્રિગુણં ચ ત્રિતત્ત્વં ચ ત્રયો દેવાસ્ત્રયોઽગ્નયઃ ।
ત્રયાણાં ચ ત્રિમૂર્તિસ્ત્વં તુરીયસ્ત્વં નમોઽસ્તુ તે ॥ ૧૩૮॥

નમઃ સવિત્રે જગદેક ચક્ષુષે જગત્પ્રસૂતિસ્થિતિનાશહેતવે ।
ત્રયીમયાય ત્રિગુણાત્મધારિણે વિરિઞ્ચિનારાયણશઙ્કરાત્મને ॥ ૧૩૯॥

યસ્યોદયેનેહ જગત્પ્રબુદ્ધ્યતે પ્રવર્તતે ચાખિલકર્મસિદ્ધયે ।
બ્રહ્મેન્દ્રનારાયણરુદ્રવન્દિતઃ સ નઃ સદા યચ્છતુ મઙ્ગલં રવિઃ ॥ ૧૪૦॥

નમોઽસ્તુ સૂર્યાય સહસ્રરશ્મયે સહસ્રશાખાન્વિતસમ્ભવાત્મને ।
સહસ્રયોગોદ્ભવભાવભાગિને સહસ્રસઙ્ખ્યાયુગધારિણે નમઃ ॥ ૧૪૧॥

યત્મણ્ડલં દીતિકરં વિશાલં રત્નપ્રભં તીવ્રમનાદિરૂપમ્ ।
દારિદ્ર્યદુઃખક્ષયકારણં ચ પુનાતુ માં તત્સવિતુર્વરેણ્યમ્ ॥ ૧૪૨॥

યન્મણ્ડલં દેવગણૈઃ સુપૂજિતં વિપ્રૈઃ સ્તુતમ્ભાવનમુક્તિકોવિદમ્ ।
તં દેવદેવં પ્રણમામિ સૂર્યં પુનાતુ માં તત્સવિતુર્વરેણ્યમ્ ॥ ૧૪૩॥

યન્મણ્ડલં જ્ઞાનઘનં ત્વગમ્યં ત્રૈલોક્યપૂજ્યં ત્રિગુણાત્મરૂપમ્ ।
સમસ્તતેજોમયદિવ્યરૂપં પુનાતુ માં તત્સવિતુર્વરેણ્યમ્ ॥ ૧૪૪॥

યન્મણ્ડલં ગૂઢમતિપ્રબોધં ધર્મસ્ય વૃદ્ધિં કુરુતે જનાનામ્ ।
યત્સર્વપાપક્ષયકારણં ચ પુનાતુ માં તત્સવિતુર્વરેણ્યમ્ ॥ ૧૪૫॥

યન્મણ્ડલં વ્યાધિ વિનાશદક્ષં યદૃગ્યજુઃ સામસુ સમ્પ્રગીતમ્ ।
પ્રકાશિતં યેન ચ ભૂર્ભુવઃસ્વઃ પુનાતુ માં તત્સવિતુવરેણ્યમ્ ॥ ૧૪૬॥

યન્મણ્ડલં વેદવિદો વદન્તિ ગાયન્તિ યચ્ચારણ સિદ્ધસઙ્ઘાઃ ।

યદ્યોગિનો યોગજુષાં ચ સઙ્ઘાઃ પુનાતુ માં તત્સવિતુર્વરેણ્યમ્ ॥ ૧૪૭॥

યન્મણ્ડલં સર્વજનેષુ પૂજિતં જ્યોતિશ્ચ કુર્યાદિહ મર્ત્યલોકે ।
યત્કાલકાલાદિમનાદિરૂપં પુનાતુ માં તત્સવિતુર્વરેણ્યમ્ ॥ ૧૪૮॥

યન્મણ્ડલં વિષ્ણુચતુર્મુખાખ્યં યદક્ષરં પાપહરં જનાનામ્ ।
યત્કાલકલ્પક્ષયકારણં ચ પુનાતુ માં તત્સવિતુર્વરેણ્યમ્ ॥ ૧૪૯॥

યન્મણ્ડલં વિશ્વસૃજાં પ્રસિદ્ધમુત્પત્તિરક્ષામ્પ્રલયપ્રગલ્ભમ્ ।
યસ્મિઞ્જગત્સંહરતેઽખિલં ચ પુનાતુ માં તત્સવિતુર્વરેણ્યમ્ ॥ ૧૫૦॥

યન્મણ્ડલં સર્વગતસ્ય વિષ્ણોરાત્મા પરં ધામ વિશુદ્ધતત્ત્વમ્ ।
સૂક્ષ્માન્તરૈર્યોગપથાનુગમ્યં પુનાતુ માં તત્સવિતુર્વરેણ્યમ્ ॥ ૧૫૧॥

યન્મણ્ડલં બ્રહ્મવિદો વદન્તિ ગાયન્તિ યચ્ચારણસિદ્ધસઙ્ઘાઃ ।
યન્મણ્ડલં વેદવિદઃ સ્મરન્તિ પુનાતુ માં તત્સવિતુર્વરેણ્યમ્ ॥ ૧૫૨॥

યન્મણ્ડલં વેદવિદોપગીતં યદ્યોગિનાં યોગપથાતુગમ્યમ્ ।
તત્સર્વવેદં પ્રણમામિ સૂર્યં પુનાતુ માં તત્સવિતુર્વરેણ્યમ્ ॥ ૧૫૩॥

મણ્ડલાષ્ટમિદં પુણ્યં યઃ પઠેત્સતતં નરઃ ।
સર્વપાપવિશુદ્ધાત્મા સૂર્યલોકે મહીયતે ॥ ૧૫૪॥

ધ્યેયઃ સદાસવિતૃમણ્ડલમધ્યવર્તી નારાયણઃ સરસિજાસન સન્નિવિષ્ટઃ ।
કેયૂરવાન્મકરકુણ્ડલવાન્ કિરીટી હારી હિરણ્મયવપુર્ધૃતશઙ્ખચક્રઃ ॥ ૧૫૫॥

સશઙ્ખચક્રં રવિમણ્ડલે સ્થિતં કુશેશયાક્રાન્તમનન્તમચ્યુતમ્ ।
ભજામિ બુદ્ધ્યા તપનીયમૂર્તિં સુરોત્તમં ચિત્રવિભૂષણોજ્જ્વલમ્ ॥ ૧૫૬॥

એવં બ્રહ્માદયો દેવા ઋષયશ્ચ તપોધનાઃ ।
કીર્તયન્તિ સુરશ્રેષ્ઠં દેવં નારાયણં બિભુવ ॥ ૧૫૭॥

વેદવેદાઙ્ગશરીરં દિવ્યદીપ્તિકરં પરમ્ ।
રક્ષોઘ્નં રક્તવર્ણં ચ સૃષ્ટિસંહારકારકમ્ ॥ ૧૫૮॥

એકચક્રો રથો યસ્ય દિવ્યઃ કનકભૂષિતઃ ।
સ મે ભવતુ સુપ્રીતઃ પદ્મહસ્તો દિવાકરઃ ॥ ૧૫૯॥

આદિત્યઃ પ્રથમં નામ દ્વિતીયં તુ દિવાકરઃ ।
તૃતીયં ભાસ્કરઃ પ્રોક્તં ચતુર્થં તુ પ્રભાકરઃ ॥ ૧૬૦॥

પઞ્ચમં તુ સહસ્રાંશુઃ ષષ્ઠં ચૈવ ત્રિલોચનઃ ।
સપ્તમં હરિદશ્વશ્ચ અષ્ટમં તુ વિભાવસુઃ ॥ ૧૬૧॥

નવમં દિનકૃત્પ્રોક્તં દશમં દ્વાદશાત્મકમ્ ।
એકાદશં ત્રયીમુર્તિર્દ્વાદશં સૂર્ય એવ ચ ॥ ૧૬૨॥

દ્વાદશાદિત્યનામાનિ પ્રાતઃકાલે પઠેન્નરઃ ।
દુઃસ્વપ્નનાશનં ચૈવ સર્વદુઃખં ચ નશ્યતિ ॥ ૧૬૩॥

દદ્રુકુષ્ઠહરં ચૈવ દારિદ્ર્યં હરતે ધ્રુવમ્ ।
સર્વતીર્થપ્રદં ચૈવ સર્વકામપ્રવર્ધનમ્ ॥ ૧૬૪॥

યઃ પઠેત્પ્રાતરુત્થાય ભક્ત્યા નિત્યમિદં નરઃ ।
સૌખ્યમાયુસ્તથાઽઽરોગ્યં લભતે મોક્ષમેવ ચ ॥ ૧૫॥

અગ્નિમીડે નમસ્તુભ્યમિષેત્વોર્જેસ્વરૂપિણે ।
અગ્ન આયાહિ પીતસ્ત્વં નમસ્તે જ્યોતિષાં પતે ॥ ૧૬૬॥

શન્નો દેવિ નમસ્તુભ્યં જગચ્ચક્ષુર્નમોઽસ્તુ તે ।
પઞ્ચમાયોપવેદાય નમસ્તુભ્યં નમોનમઃ ॥ ૧૬૭॥

પદ્માસનઃ પદ્મકરઃ પદ્મગર્ભસમદ્યુતિઃ ।
સપ્તાશ્વરથસંયુક્તો દ્વિભુજઃ સ્યાત્સદા રવિઃ ॥ ૧૬૮॥

આદિત્યસ્ય નમસ્કારં યે કુર્વન્તિ દિનેદિને ।
જન્માન્તરસહસ્રેષુ દારિદ્ર્યં નોપજાયતે ॥ ૧૬૯॥

(નમો ધર્મનિધાનાય નમઃ સુકૃતસાક્ષિણે ।
નમઃ પ્રત્યક્ષદેવાય ભાસ્કરાય નમોનમઃ ॥

અપરઃ શરણં નાસ્તિ ત્વમેવ શરણં મમ ।
તસ્માત્કારુણ્યભાવેન રક્ષ રક્ષ દિવાકર ॥

પૌરોહિત્યં રજનિચરણં ગ્રામણીત્વં નિઃ યોગો
    માઠાપત્યં વિતથવચનં સાક્ષિવાદઃ પરાન્નમ્ ।
બ્રહ્મદ્વેષ ખલજનરતિઃ પ્રાણિષુ નિર્દયત્વં
    માભૂદેતન્મમ દિનપતે જન્મજન્માન્તરેઽપિ ॥

ઉદયંસ્તુ મહાભાનુસ્તેજસા ચાભયઙ્કરઃ ।
સહસ્રરશ્મિદીપ્તશ્ચત્વાદિત્યઃ પ્રીયતાં મમ ॥)

ઉદયગિરિમુપેતં ભાસ્કરં પદ્મહસ્તં
   નિખિલભુવનનેત્રં રત્નરત્નોપમેયમ્ ।
તિમિરકરિમૃગેન્દ્રં બોધકં પદ્મિનીનાં
   સુરવરમભિવન્દે સુન્દરં વિશ્વવન્દ્યમ્ ॥ ૧૭૦॥

ઇતિ શ્રીભવિષ્યોત્તરપુરાણે શ્રીકૃષ્ણાર્જુનસંવાદે
આદિત્યહૃદયસ્તોત્રં સમ્પૂર્ણમ્ ॥

Proofread by Nat Natarajan, NA

*AdityahRidayam*
pdf was typeset on March 11, 2023

Please send corrections to *sanskrit@cheerful.com*